श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

## श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे

# ॥ द्वात्रिंशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्वात्रिंशः सर्गः ॥

## शूर्पणखाया लङ्कायां रावणस्य पार्श्वे गमनम्

ततः शूर्पणखा दृष्ट्वा सहस्राणि चतुर्दश।
हतान्येकेन रामेण रक्षसां भीमकर्मणाम्॥ **3.32.1** ॥

दूषणं च खरं चैव हतं त्रिशिरसं रणे।
दृष्ट्वा पुनर्महानादान् ननाद जलदोपमा॥ **3.32.2** ॥

सा दृष्ट्वा कर्म रामस्य कृतमन्यैः सुदुष्करम्।
जगाम परमोद्विग्ना लङ्कां रावणपालिताम्॥ **3.32.3** ॥

सा ददर्श विमानाग्रे रावणं दीप्ततेजसम्।
उपोपविष्टं सचिवैर्मरुद्भिरिव वासवम्॥ **3.32.4** ॥

आसीनं सूर्यसङ्काशे काञ्चने परमासने।
रुक्मवेदिगतं प्राज्यं ज्वलन्तमिव पावकम्॥ **3.32.5** ॥

देवगन्धर्वभूतानामृषीणां च महात्मनाम्।
अजेयं समरे घोरं व्यात्ताननमिवान्तकम्॥ **3.32.6** ॥

देवासुरविमर्देषु वज्राशनिकृतव्रणम्।
ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसम्॥ **3.32.7** ॥

विंशद्भुजं दशग्रीवं दर्शनीयपरिच्छदम्।
विशालवक्षसं वीरं राजलक्षणलक्षितम्॥ **3.32.8** ॥

नद्धवैदूर्यसङ्काशं तप्तकाञ्चनभूषणम्।
सुभुजं शुक्लदशनं महास्यं पर्वतोपमम्॥ **3.32.9** ॥

विष्णुचक्रनिपातैश्च शतशो देवसंयुगे।
अन्यैः शस्त्रैः प्रहारैश्च महायुद्धेषु ताडितम्॥ **3.32.10** ॥

अहताङ्गैः समस्तैस्तं देवप्रहरणैस्तदा।
अक्षोभ्याणां समुद्राणां क्षोभणं क्षिप्रकारिणम्॥ **3.32.11** ॥

क्षेप्तारं पर्वताग्राणां सुराणां च प्रमर्दनम्।
उच्छेत्तारं च धर्माणां परदाराभिमर्शनम्॥ **3.32.12** ॥

सर्वदिव्यास्त्रयोक्तारं यज्ञविघ्नकरं सदा।
पुरीं भोगवतीं गत्वा पराजित्य च वासुकिम्॥ **3.32.13** ॥

तक्षकस्य प्रियां भार्यां पराजित्य जहार यः।
कैलासं पर्वतं गत्वा विजित्य नरवाहनम्॥ **3.32.14** ॥

विमानं पुष्पकं तस्य कामगं वै जहार यः।
वनं चैत्ररथं दिव्यं नलिनी नन्दनं वनम्॥ **3.32.15** ॥

विनाशयति यः क्रोधाद् देवोद्यानानि वीर्यवान्।
चन्द्रसूर्यौ महाभागावुत्तिष्ठन्तौ परन्तपौ॥ **3.32.16** ॥

निवारयति बाहुभ्यां यः शैलशिखरोपमः।
दशवर्षसहस्राणि तपस्तप्त्वा महावने॥ **3.32.17** ॥

पुरा स्वयम्भुवे धीरः शिरांस्युपजहार यः।
देवदानवगन्धर्वपिशाचपतगोरगैः॥ **3.32.18** ॥

अभयं यस्य सङ्ग्रामे मृत्युतो मानुषादृते।
मन्त्रैरभिष्टुतं पुण्यमध्वरेषु द्विजातिभिः॥ **3.32.19** ॥

हविर्धानेषु यः सोममुपहन्ति महाबलः।
प्राप्तयज्ञहरं दुष्टं ब्रह्मघ्नं क्रूरकारिणम्॥ **3.32.20** ॥

कर्कशं निरनुक्रोशं प्रजानामहिते रतम्।
रावणं सर्वभूतानां सर्वलोकभयावहम्॥ **3.32.21** ॥

राक्षसी भ्रातरं क्रूरं सा ददर्श महाबलम्।
तं दिव्यवस्त्राभरणं दिव्यमाल्योपशोभितम्॥ **3.32.22** ॥

आसने सूपविष्टं तं काले कालमिवोद्यतम्।
राक्षसेन्द्रं महाभागं पौलस्त्यकुलनन्दनम्॥ **3.32.23** ॥

उपगम्याब्रवीद् वाक्यं राक्षसी भयविह्वला।
रावणं शत्रुहन्तारं मन्त्रिभिः परिवारितम्॥ **3.32.24** ॥

तमब्रवीद् दीप्तविशाललोचनं
प्रदर्शयित्वा भयलोभमोहिता।
सुदारुणं वाक्यमभीतचारिणी
महात्मना शूर्पणखा विरूपिता॥ **3.32.25** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये अरण्यकाण्डे द्वात्रिंशः सर्गः॥